# Vyasakritam Vishnu Stotram

# વ્યસકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Vyasakritam Vishnu Stotram

File name : vyasakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, brahmapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 180/1-12||

Latest update : September 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 29, 2024

*sanskritdocuments.org*

# વ્યસકૃતં વિષ્ણુસ્તોત્રમ્

વ્યાસ ઉવાચ ।
નમસ્કૃત્વા સુરેશાય વિષ્ણવે પ્રભવિષ્ણવે
પૂરુષાય પુરાણાય શાશ્વતાયાવ્યયાય ચ ॥ ૧॥

ચતુર્વ્યૂહાત્મને તસ્મૈ નિર્ગુણાય ગુણાય ચ ।
વરિષ્ઠાય ગરિષ્ઠાય વરેણ્યાયામિતાય ચ ॥ ૨॥

યજ્ઞાઙ્ગાયાખિલાઙ્ગાય દેવાદ્યૈરીપ્સિતાય ચ ।
યસ્માદણુતરં નાસ્તિ યસ્માન્નાસ્તિ બૃહત્તરમ્ ॥ ૩॥

યેન વિશ્વમિદં વ્યાપ્તમજેન સચરાચરમ્ ।
આવિર્ભાવતિરોભાવદૃષ્ટાદૃષ્ટવિલક્ષણમ્ ॥ ૪॥

વદન્તિ યત્સૃષ્ટમિતિ તથૈવાપ્યુપસંહૃતમ્ ।
બ્રહ્મણે ચાઽઽદિદેવાય નમસ્કૃત્ય સમાધિના ॥ ૫॥

અવિકારાય શુદ્ધાય નિત્યાય પરમાત્મને ।
સદૈકરૂપરૂપાય જિષ્ણવે વિષ્ણવે નમઃ ॥ ૬॥

નમો હિરણ્યગર્ભાય હરયે શઙ્કરાય ચ ।
વાસુદેવાય તારાય સર્ગસ્થિત્યન્તકારિણે ॥ ૭॥

એકાનેકસ્વરૂપાય સ્થૂલસૂક્ષ્માત્મને નમઃ ।
અવ્યક્તવ્યક્તભૂતાય વિષ્ણવે મુક્તિહેતવે ॥ ૮॥

સર્ગસ્થિતિવિનાશાનાં જગતો યો જગન્મયઃ ।
મૂલભૂતો નમસ્તસ્મૈ વિષ્ણવે પરમાત્મને ॥ ૯॥

આધારભૂતં વિશ્વસ્યાપ્યણીયાંસમણીયસામ્ ।
પ્રણમ્ય સર્વભૂતસ્થમચ્યુતં પુરુષોત્તમમ્ ॥ ૧૦॥

જ્ઞાનસ્વરૂપમત્યન્તં નિર્મલં પરમાર્થતઃ ।

તમેવાર્થસ્વરૂપેણ ભ્રાન્તિદર્શનતઃ સ્થિતમ્ ॥ ૧૧॥

વિષ્ણું ગ્રસિષ્ણું વિશ્વસ્ય સ્થિતિસર્ગે તથા પ્રભુમ્ ।
અનાદિં જગતામીશમજમક્ષયમવ્યયમ્ ॥ ૧૨॥

ઇતિ બ્રહ્મપુરાણે અશીત્યધિકશતતમાધ્યાયાન્તર્ગતં
વ્યસકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્મપુરાણ । અધ્યાય ૧૮૦/૧-૧૨॥

brahmapurANa . adhyAya 180/1-12..

Proofread by PSA Easwaran

*Vyasakritam Vishnu Stotram*

pdf was typeset on September 29, 2024

Please send corrections to *sanskrit@cheerful.com*